श्रीसीतारामाभ्यां नमः ।

प्रतिपक्षिभयङ्करजगद्गुरुश्रीहर्यानन्दाचार्य-

सिद्धशिरोमणिप्रणीता

प्रमाणदीपिका

(स्वशतान्दीमहोत्सवे श्राहर्यानन्दाचार्योपदिष्टः प्रबन्धः)

रामं सीतां तथाचार्यं श्रियानन्दं प्रणम्य च ।
प्रमाणानां प्रकाशाय कुर्वे प्रमाणदीपिकाम् ॥१॥

अथ प्रत्यक्षप्रमाणमयूखः

चिदचिदीशतत्त्वाना ज्ञानं प्रामाणिकं च यत् ।
मोक्षस्य साधनं तद्धि 'भोक्ता भोग्यमि'तिश्रुतेः ॥२॥
प्रमायाः करणं तत्र प्रमाणं सम्मतं बुधैः ।
अबाधव्यवहारस्यानुगुणा तु मतिः प्रमा ॥३॥
करणं चावगन्तव्यं व्यापारशालि कारणम् ।
त्रिधा प्रमाणमप्यक्षानुमानशब्दभेदतः ॥४॥
सम्भवस्योपमानस्य चार्थापत्तेस्तथैव हि ।
अन्तर्भावोनुऽमाने तु तत्त्वज्ञैररीक्षतः ॥५॥
ऐन्द्रियमाप्तमूलं यच्छब्दे चान्तर्भवत्यदः ।
अनुमानाग्रतर्कस्य मन्यते स्वाग्निरूपता ॥६॥
भावान्तरेण चभावप्रतीतिरुपपद्यते ।
अभावाख्यः पदार्थस्त्वतिरिक्तो मन्यते न तत् ॥

अन्वयव्याप्तितश्चाथान्वयी हेतुर्बुधैर्मतः ।
अभावव्याप्तितो हेतुर्व्यतिरेकी समीरितः ॥७॥
सिद्धान्ते द्विविधश्चैव सद्धेतुर्बुधसम्मतः ।
केवलव्यतिरेकी तु सिद्धान्ते मन्यते न हि ॥८॥
उभे चात्रानुमानाङ्गे व्याप्तिश्च पक्षधर्मता ।
द्वयोरन्यतरस्याथ विरहे हेतुदुष्टता ॥९॥
व्यभिचारी विरुद्धोऽथासिद्धः सत्प्रतिपक्षकः ।
बाधितश्चेति पञ्चापि हेत्वाभासाः प्रकीर्त्तिताः ॥१०॥
हेतुश्च व्यभिचारी हि स्वस्थानातिक्रमे भवेत् ।
स ह्यनैकान्तिकश्चाथ द्विविधः परिकीर्तितः ॥११॥
विपक्षेऽपि स्थितश्चेत् स साधारणो मतस्तदा ।
बुधै. सपक्षमात्रस्थोऽसाधारण उदाहृतः ॥१२॥
साध्याभावेन स व्याप्तो विरुद्धत्वेन सम्मतः ।
आदिमस्त्रिष्वसिद्धेष्वाश्रयासिद्धः समीरितः ॥१३॥
पक्षश्च पक्षताऽवच्छेदकशून्यश्च तत्र हि ।
पक्षे च हेतुराहित्यं स्वरूपासिद्धता स्मृता ॥१४॥
व्यप्यत्वासिद्धता चात्र द्विधा प्राज्ञैः समर्थिता ।
व्याप्तिग्राहकमानस्य शून्यत्वात् तत्र चादिमा ॥१५॥
हेतावुपाधिसत्त्वाच्च द्वितीया सम्मता बुधैः ।
साध्यव्यापकतायां च साधनाव्यापकत्वकम् ॥१६॥

उपाधित्वेन सम्प्रोक्तं हेतोः परमदूषणम् ।
प्रतिपक्षस्य सत्त्वे तु हेतोः सत्प्रतिपक्षता ॥१७॥

यस्य प्रबलमानेन साध्याभावो विनिश्चितः ।
दार्शनिकैः स हेतुर्हि बाधितः सम्प्रकीर्तितः ॥१८॥

अनुमानं द्विधा स्वार्थं परार्थं चेति भेदतः ।
स्वार्थेन स्वानुमा चात्र परार्थेन परानुमा ॥१९॥

न्यायजस्तु परामर्शः परानुमितिकारणम् ।
न्यायस्तत्र प्रतिज्ञाद्यवयवपञ्चकं मतः ॥२०॥

प्रतिज्ञा साध्यनिर्देशो हेतूक्तेर्हेतुता तथा ।
व्याप्तिनिर्देशपूर्वा हि दृष्टान्तोक्तिरुदाहृता ॥२१॥

व्याप्यस्य पक्षवृत्तित्वबोधश्चोपनयो मतः ।
निगमनं तु साध्यस्योपसंहारवचः खलु ॥२२॥

नैयायिका भवन्त्येतत्पञ्चावयववादिनः ।
वेदान्तिनो वदन्त्येष्वनुमासिद्धौ यथारुचि ॥२३॥

इति प्रतिपक्षिभयङ्करजगद्गुरुश्रीहर्षानन्दाचार्य—
सिद्धाशिरोमणिप्रणीतायां प्रमाणदीपिकायां—
अनुमानप्रमाणनिरूपणाख्यो
द्वितीयो मयूखः ॥२॥

अथ शब्दप्रमाणमयूखः

अनाप्तानुक्तवाक्यस्य शब्दप्रमाणता मता ।
द्वारं पदार्थबुद्धिश्च शक्तिधीः सहकारिणी ॥१॥

वाक्यं पदसमूहश्च शक्तं पदतया मतम् ।
अभिधाख्या च शक्तिर्हि वेदस्यार्थावबोधिता ॥२॥
मुख्या वृत्तिः पदस्यार्थे सर्व प्राज्ञैरुदीरिता ।
घटेऽयुक्ते घटे चैवं शक्तिर्घटपदस्य हि ॥३॥
सम्बन्धोऽभिहितः प्राज्ञैर्वृत्तिः पदपदार्थयोः ।
मुख्यार्थस्य हि बाधे तु वृत्तिर्मतौपचारिकी ॥४॥
गौणी च लक्षणा चेति भेदात् सा द्विविधा पुनः ।
शक्यस्य गुणवत्त्वेन त्वाद्या वृत्तिर्मता बुधैः ॥५॥
लक्षणा शक्यसम्बन्धः साऽन्वयानुपपत्तितः ।
जहदजहच्चेति द्विधा सा परिकीर्त्तिता ॥६॥
आकांक्षायोग्यताऽऽसत्तिमद् वाक्यं हि प्रमापकम् ।
प्रमाणमखिलो वेदः सिद्धे व्युत्पत्तिसम्भवात् ॥७॥
भागद्वयं हि वेदस्य कर्मब्रह्माभिधायकम् ।
तत्राद्ये कथितं कर्म ब्रह्माराधनलक्षणम् ॥८॥
शास्त्रे हि पूर्वमीमांसाऽऽख्येऽस्य शंकाः समाहिताः ।
ब्रह्मणो वर्णितं चान्त्ये स्वरूपं च गुणादिकम् ॥९॥
एतच्छङ्कासमाधानं मीमांसा चोत्तरा मता ।
मता मीमांसयोस्तस्मादुभयोरेकशास्त्रता ॥१०॥
विध्यर्थवादमन्त्रेति भेदाद् वेदस्त्रिधा मतः ।
सम्मतस्तत्र विद्वद्भिर्विधिवाक्यं प्रवर्त्तकम् ॥११॥

विधिरत्यन्तमप्राप्ते नियमः पाक्षिके सति ।
तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते ॥१२॥

इत्येवं हि विधिः प्राज्ञैस्त्रिविधः सम्प्रकीर्त्तितः ।
नित्यो नैमित्तिकः काम्यश्चापि भेदा विधेर्मताः ॥१३॥

प्रवृत्युत्तम्भकं वाक्यमर्थवादतया मतम् ।
मन्त्रत्वेन मतो वेदोऽनुष्ठेयार्थप्रकाशकः ॥१४॥

शिक्षा व्याकरणं छन्दो निरुक्तं ज्योतिषं तथा ।
कल्पश्चेति षडङ्गानि वेदस्योक्तानि वैदिकैः ॥१५॥

पूर्वक्रमविशिष्टा हि वेदाश्चेशसमीरिता. ।
नित्या अपौरुषेयास्ते तस्माद् बुधैश्च सम्मताः ॥१६॥

नित्यो वेदश्च निर्दोषो वक्तृभावाद्धि सम्मतः ।
प्रामाण्यं हि बुधैर्वेदे स्वीकृतं स्वत एव तत् ॥१७॥

स्मृत्यादेस्तु प्रमाणत्वं वेदमूलतया मतम् ।
शास्त्रं वेदविरुद्धं च नैव याति प्रमाणताम् ॥१८॥

देहस्य वाचकाः शब्दा पर्यवस्यन्ति देहिनि ।
सर्वशब्दकवाच्यस्तद् रामः सर्वशरीरक ॥१९॥

इति प्रतिपक्षिभयङ्करजगद्गुरुश्रीहर्यानन्दाचार्यसिद्धशिरोमणिप्रणीतायां प्रमाणदीपिकायां शब्दप्रमाणनिरूपणाख्यस्तृतीयो मयूखः ॥३॥

श्रियानन्दार्यशिष्येण हर्यानन्देन निर्मिता ।
प्रकाशिका प्रमाणानां भूयात् प्रमाणदीपिका ॥२०॥

—०—